श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे त्रयोविंशोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ पञ्चमस्कन्धे त्रयोविंशोऽध्यायः ॥

श्रीशुक उवाच
अथ तस्मात्परतस्त्रयोदशलक्षयोजनान्तरतो
यत्तद्विष्णोः परमं पदमभिवदन्ति यत्र ह महा -
भागवतो ध्रुव औत्तानपादिरग्निनेन्द्रेण
प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः
सबहुमानं दक्षिणतः क्रियमाण इदानीमपि
कल्पजीविनामाजीव्य उपास्ते तस्येहानुभाव
उपवर्णितः ॥ 1 ॥

स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रा -
दीनामनिमिषेणाव्यक्तरंहसा भगवता कालेन
भ्राम्यमाणानां स्थाणुरिवावष्टम्भ ईश्वरेण
विहितः शश्वदवभासते ॥ 2 ॥

यथा मेढीस्तम्भ आक्रमणपशवः संयोजिता -
स्त्रिभिस्त्रिभिः सवनैर्यथास्थानं मण्डलानि
चरन्त्येवं भगणा ग्रहादय एतस्मिन् -
नन्तर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवाव -
लम्ब्य वायुनोदीर्यमाणा आकल्पान्तं
परिचङ्क्रमन्ति नभसि यथा मेघाः श्येनादयो

वायुवशाः कर्मसारथयः परिवर्तन्ते एवं
ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः
कर्मनिर्मितगतयो भुवि न पतन्ति ॥ 3 ॥

केचनैतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो
वासुदेवस्य योगधारणायामनुवर्णयन्ति ॥ 4 ॥

यस्य पुच्छाग्रेऽवाक्शिरसः कुण्डलीभूतदेहस्य
ध्रुव उपकल्पितस्तस्य लाङ्गूले प्रजापतिरग्निरिन्द्रो
धर्म इति पुच्छमूले धाता विधाता च कट्यां
सप्तर्षयः।
तस्य दक्षिणावर्तकुण्डलीभूतशरीरस्य
यान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्राण्युप -
कल्पयन्ति दक्षिणायनानि तु सव्ये।
यथा शिशुमारस्य कुण्डलाभोगसन्निवेशस्य
पार्श्वयोरुभयोरप्यवयवाः समसङ्ख्या भवन्ति।
पृष्ठे त्वजवीथी आकाशगङ्गा चोदरतः ॥ 5 ॥

0.0in पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्यो -
रार्द्राश्लेषे च दक्षिणवामयोः पश्चिमयोः
पादयोरभिजिदुत्तराषाढे दक्षिणवामयोर्नासि -
कयोर्यथासङ्ख्यं श्रवणपूर्वाषाढे
दक्षिणवामयोर्लोचनयोर्धनिष्ठा
मूलं च दक्षिणवामयोः कर्णयोर्मघादीन्यष्ट
नक्षत्राणि दक्षिणायनानि वामपार्श्ववङ्क्रिषु
युञ्जीत तथैव मृगशीर्षादीन्युदगयनानि
दक्षिणपार्श्ववङ्क्रिषु प्रातिलोम्येन प्रयुञ्जीत

शतभिषा ज्येष्ठे स्कन्धयोर्दक्षिण -
वामयोर्न्यसेत् ॥ 6 ॥

उत्तराहनावगस्तिरधराहनौ यमो मुखेषु चाङ्गारकः
शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो
हृदये नारायणो मनसि चन्द्रो नाभ्यामुशना
स्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले
केतवः सर्वाङ्गेषु रोमसु सर्वे तारागणाः ॥ 7 ॥

एतदु हैव भगवतो विष्णोः सर्वदेवतामयं
रूपमहरहः सन्ध्यायां प्रयतो वाग्यतो
निरीक्षमाण उपतिष्ठेत नमो ज्योतिर्लोकाय
कालायनायानिमिषां पतये महापुरुषाया -
भिधीमहीति ॥ 8 ॥

ग्रहर्क्षताराममयमाधिदैविकं
    पापापहं मन्त्रकृतां त्रिकालम्।
नमस्यतः स्मरतो वा त्रिकालं
    नश्येत तत्कालजमाशु पापम् ॥ 9 ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे शिशुमारसंस्थावर्णनं नाम
त्रयोविंशोऽध्यायः ॥